दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-243 | 1 | जून 25, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठशुक्लैकादशी
आषाढः 11 प्रविष्टांशः मङ्गलमयः भवेत्

2 एचपीयू- संस्थाने पीएच.डी. प्रवेशाय आवेदनस्य अन्तिमतिथिः वर्धिता, अधुना २६ जून पर्यन्तं कुर्वन्तु आवेदनम्

3 Shrikhand Yatra- भीमडवारी-पार्वतीबाग- मार्गः संकटपूर्णः, श्रीखण्डयात्रायां संशयः

4 पञ्जाबराज्यं मादकद्रव्यैः, वर्धमानेन ऋणभारेण, गङ्गस्टर- संस्कृत्या च गम्भीररूपेण हानितम्- अनुरागठाकुरः

## भारतेन संयुक्तराष्ट्रसङ्घस्य एकस्मिन् मञ्चे पाकिस्तान-देशेन कृत काश्मीरविषयक-चर्चायां दृढतया आक्षेपः प्रकटितः, इस्लामाबादः अस्य मञ्चस्य राजनीतिकरणम् अकरोत् इति आक्षेपोपि कृतः



**हिमसंस्कृतवार्ता।** भारतेन संयुक्तराष्ट्रसङ्घस्य एकस्मिन् मञ्चे पाकिस्तान-देशेन कृत काश्मीरविषयक चर्चायां दृढतया आक्षेपः प्रकटितः, इस्लामाबादः अस्य मञ्चस्य राजनीतिकरणम् अकरोत् इति आक्षेपोपि कृतः, अपि च सह-अध्यक्षत्वेन स्वस्थानस्य दुरुपयोगाय अपि भारतेन कद्वालोचिता। न्यूयार्क-नगरे संयुक्तराष्ट्रसङ्घस्य भारतस्य स्थायीप्रतिनिधिना पी हरीशेन पाकिस्तानस्य स्थायीप्रतिनिधिद्वारा असीम् इफ्तिखार् अहमद् इत्यस्य वक्तव्यस्य प्रतिक्रियारूपेण एषा टिप्पणी कृता। पाकिस्तानात् हस्तक्षेपस्य प्रतिक्रियारूपेण, श्री. हरीशः सह-अध्यक्षस्य आचरणस्य निन्दाम् अकरोत्, जम्मू-कश्मीर्-विषये भारतस्य दीर्घकालस्य स्थितिं पुनरुद्घाटयत् च। भारतीयः राजदूतः संयुक्तराष्ट्रसङ्घस्य-अशीति संरचनायाः अन्तर्गतस्य संयुक्तराष्ट्रसङ्घस्य आदेशानां वर्तमानसमीक्षायाः विषये अपि अवदत्, यस्य उद्देश्यं सम्पूर्ण संस्थायां कार्यक्षमतां वर्धयितुं अस्ति।

## सुभाषितम्

**स्वयं महेशः श्वशुरो नगेशः,**
**सखा धनेशस्तनयो गणेशः।**
**तथापि भिक्षाटनमेव शंभोः,**
**वलीयसी केवलमीश्वरेच्छा।।**

अर्थात्- भावार्थ:- स्वयं देवों में श्रेष्ठ महेश कहलाते हैं, उनके श्वशुर पर्वतराज हिमालय हैं, मित्र देवताओं के कोषाध्यक्ष कुबेर हैं तथा उनका पुत्र प्रसिद्ध देवता गणेश है। परन्तु फिर भी वे भिक्षा मांग कर जीवन यापन करते है। इसका और कोई अन्य कारण न हो कर केवल परमेश्वर की इच्छा है।

## ईरान-देशस्य परिष्कृत-सुरक्षास्थितिं वीक्ष्य तेहरान स्थित-भारतीय-दूतावास-पक्षतः अग्रिम-सूचना पर्यन्तं अनावश्यक-यात्रां वर्जयितुम् उपदिष्टम्



**हिमसंस्कृतवार्ता।** तेहरान-स्थित-भारतीय-दूतावासपक्षतः ईरान-देशस्य परिष्कृतसुरक्षास्थितिं वीक्ष्य भारतीयनागरिकाणां कृते एकः संशोधितः सुरक्षा-परामर्शः निर्गतः। देशस्य सकारात्मक-परिवर्तनानि सामान्यस्थितिं च अवलोक्य दूतावासेन नागरिकाः ईरान-प्रवासविषये विचारं कर्तुं सूचिताः, किन्तु साकमेव अग्रिम सूचना पर्यन्तं अनावश्यक-यात्रां वर्जयितुम् अपि उपदिष्टम्। परामर्शानुसारम्, ये भारतीयाः सम्प्रति ईराने निवसन्ति अथवा केनापि अनिवार्यकारणेन तत्र गच्छन्तः सन्ति, तेभ्यः उच्चस्तरीय अवधानतया वर्तितुं, सतर्क भवितुं तथा च परिस्थिति-अनुकूल-जागरूकतां धारयितुं निर्देशः दत्तः। दूतावासेन सर्वे भारतीयनागरिकाः शीघ्रातिशीघ्रं दूतावासे स्वविवरणं पञ्जीकर्तुं अपि निर्दिष्टाः।आपत्काले साहाय्यार्थं दूतावासेन एताः दूरभाष-सङ्ख्याः निर्गताः +98 91 28 10 91 15, +98 91 28 10 91 09, +98 91 28 10 91 02, +98 99 32 17 93 59 नागरिकाः cons.-tehran@mea.gov.in इति ईमेल संकेते सम्पर्क कर्तुं शक्नुवन्ति।

## भारत-दक्षिणकोरिया देशयोः सम्बन्धस्य सुदृढीकरणस्य महत्त्वं प्रतिपादितवान् विदेशमन्त्री डॉ. एस्. जयशङ्करः

**हिमसंस्कृतवार्ता।** विदेशमन्त्री डॉ. एस्. जयशङ्करः वर्तमान-वैश्विक समाह्वनानां मध्ये भारत-दक्षिणकोरिया देशयोः सम्बन्धस्य सुदृढीकरणस्य महत्त्वं प्रतिपादितवान्। सः अवदत् यत् समान-मूल्यवन्तः तथा परस्पर-विश्वासयुताः देशाः सम्प्रति इतोऽपि निकटेन सहकार्यं कुर्युः। सियोल नगरे दक्षिणकोरियायाः विदेशमन्त्रिणा चो ह्युन इत्यनेन सह प्रवृत्तायां चर्चायाम् आरम्भिक-भाषणे तेन प्रतिपादितं यत् वर्तमाना अन्ताराष्ट्रिय-स्थितिः विश्वसनीय-सहयोगिनां मध्ये परस्पर-सहयोगं अनिवार्यं करोति । सामाजिकान्तर्जालीय-माध्यमेन एकेन सन्देशेन विदेशमन्त्रिणा सूचितं यत् उभौ द्वयोः देशयोः मध्ये राजनीतिक व्यापार-निवेश-रक्षा-प्रौद्योगिकी स्वच्छ ऊर्जा-संस्कृति-परस्पर-जनसम्पर्कमित्यादिषु क्षेत्रेषु सहयोगस्य समीक्षां विहितवन्तौ।




अनेन सहैव, नवाचारः, वित्तीय-प्रौद्योगिकी तथा च बहुपक्षीय-मञ्चेषु उपलब्ध-अवसरेषु अपि विस्तरेण चर्चा समजायत। तौ स्व-स्व क्षेत्रस्य तथा च वैश्विक विकासस्य परिदृश्ये अपि विचाराणाम् आदान-प्रदानं कृतवन्तौ ।

हिमसंस्कृतवार्ता
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे करवा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७११९
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## केंद्रीय-आवास-एवं-नगरीय-कार्यमन्त्री मनोहर लालः राष्ट्रियराजधान्याम् 'सेन्ट्रल विस्टा कॉरिडोर' इत्यस्य कृते

### 'केन्द्रीय सचिवालय' मेट्रो-स्थानके निर्माणकार्यस्य औपचारिकं उद्घाटनं कृतवान्



**हिमसंस्कृतवार्ता।** केंद्रीय-आवास-एवं-नगरीय-कार्यमन्त्री मनोहर लालः राष्ट्रियराजधान्याम् 'सेन्ट्रल विस्टा कॉरिडोर' इत्यस्य कृते 'केन्द्रीय सचिवालय' मेट्रो-स्थानके निर्माणकार्यस्य औपचारिकं उद्घाटनं कृतवान्। वार्ताहरैः सह संवादे मन्त्री इमं क्षणं ऐतिहासिकम् इति वर्णितवान्। तेन प्रख्यापितं यत् इयं परियोजना सर्वकारीय-कर्मचारिणाम् अन्येषां च सर्वेषां वृत्तिजीविनां कृते दैनिक-गमनागमनं अत्यंतं सुगमं सुव्यवस्थितं च करिष्यति, येन सम्पूर्ण-देहली-क्षेत्रे यात्रा इतोऽपि सरला, क्षिप्रा, कार्यकुशला च भविष्यति।

## हॉकी इण्डिया' संस्था आगामी यूनाइटेड किंगडम प्रवासार्थं चतुर्विंशति सदस्यानां कनिष्ठ-महिला-हॉकी-दलस्य उद्घोषणां अकरोत्

हॉकी इण्डिया' संस्था आगामी यूनाइटेड किंगडम प्रवासार्थं चतुर्विंशति सदस्यानां कनिष्ठ-महिला-हॉकी-दलस्य उद्घोषणां अकरोत्। अयं प्रवासः जुलाई मासस्य पंचदिनांकाद् चतुर्दश-दिनांकं यावत् प्रचलिष्यति। नूतन-प्रशिक्षकस्य टिम व्हाइट इत्यस्य निर्देशने भारतीयदलं स्कॉटलैण्ड-इङ्ग्लैण्ड देशयोः विभिन्न स्थानेषु सप्त द्वन्द्वान् क्रीडिष्यति, यत् आगामी 'कनिष्ठ एशिया कप' इत्यादि-अन्ताराष्ट्रिय-प्रतियोगितानां सिद्धतायै 'एक्सपोजर टूर' रूपेण अस्ति।

# एचपीयू- संस्थाने पीएच.डी. प्रवेशाय आवेदनस्य

## अन्तिमतिथिः वर्धिता, अधुना २६ जून पर्यन्तं कुर्वन्तु आवेदनम्




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशविश्वविद्यालयेन (HPU) नियमित-तथा अंशकालिक- (पार्ट टाइम) पीएच.डी. पाठ्यक्रमाणां कृते ऑनलाइन-आवेदनस्य अन्तिमा तिथिः वर्धयित्वा २६ जून इति कृता। 'डीन ऑफ स्टडीज' कार्यालयद्वारा प्रचालित-अधिसूचनानुसारं २१ मई, १० जून तथा १६ जून दिनाङ्केषु प्रसारितानां प्रवेशसूचनानां क्रमे एव एषः निर्णयः स्वीकृतः अस्ति। पूर्वम् आवेदनस्य अन्तिमा तिथिः २२ जून इति निर्धारिता आसीत्। विश्वविद्यालयेन स्पष्टीकृतं यत् केवलम् आवेदनस्य समयसीमा वर्धिता अस्ति। प्रवेशप्रक्रियया सम्बद्धाः अन्याः सर्वाः शर्ताः, योग्यता-मापदण्डाः, विभागानुसारं स्थानानि (सीट्स) तथा चयनप्रक्रिया च पूर्ववत् एव स्थास्यन्ति। अस्मिन् सत्रे एचपीयू-संस्थानस्य ३२ विभागेषु, संस्थानेषु, केन्द्रेषु च आहत्य ५०२ पीएच.डी. स्थानेषु प्रवेशः भविष्यति। एतेषु २९६ नियमित-स्थानानि, १७५ अंशकालिक-स्थानानि, ३१ कर्मचारीवर्गस्य स्थानानि सम्मिलितानि सन्ति। अभ्यर्थिनः अधुना २६ जून पर्यन्तं विश्वविद्यालयस्य ऑनलाइन- पोर्टल-माध्यमेन आवेदनं कर्तुं शक्ष्यन्ति। विश्वविद्यालयेन योग्याः अभ्यर्थिनः निर्धारित-समयावधौ आवेदनप्रक्रियां पूरयितुं सूचिताः। एचपीयू-मैट (HPU MAT) परीक्षायाः परिणामः घोषितः, ऑनलाइन उपलब्धः च एचपीयू- संस्थानेन 'एचपीयू मैनेजमेंट एप्टीट्यूड टेस्ट' 2026 परीक्षायाः परिणामः घोषितः। विश्वविद्यालय-प्रशासनानुरूपं परीक्षायां सम्मिलिताः अभ्यर्थिनः स्वकीयं परिणामं विश्वविद्यालयस्य आधिकारिक-वेबसाइट- पोर्टल- माध्यमेन द्रष्टुं शक्नुवन्ति। अस्याः परीक्षायाः आधारेण एव विश्वविद्यालयस्य एम.बी.ए. पाठ्यक्रमे प्रवेशः प्रदास्यते। परिणाम-घोषणायाः सह एव चयनप्रक्रियायाः अग्रिमचरणस्य सज्जता अपि आरब्धा। विश्वविद्यालयेन अभ्यर्थिनः परामृष्टाः यत् ते 'काउंसलिंग' तथा प्रवेश-सम्बन्धितानां आगामी- सूचनानां कृते नियमितरूपेण विश्वविद्यालयस्य जालपुटकं पश्येयुः।

### बी.टेक., एम.एस.सी. प्रवेश-परीक्षाणाम् परिणामाः घोषिताः

एचपीयू- संस्थानेन विविधानां स्नातकोत्तर-स्नातक-पाठ्यक्रमाणां च प्रवेशपरीक्षाणां परिणामाः घोषिताः। एतेषु एम.एस.सी. भौतिकशास्त्रम्, एम.एस.सी. रसायनशास्त्रम्, एम. सी. ए., बी.टेक., इत्येतेषां परिणामाः मुख्याः सन्ति। विश्वविद्यालयस्य विधिसंस्थानेन 'बीए एलएलबी (ऑनर्स)' पाठ्यक्रमस्य कृते अन्तिमा प्रवेशसूची अपि प्रसारिता। प्रौद्योगिकीसंस्थानेन बी.टेक. प्रथमवर्षस्य प्रवेशपरीक्षायाः परिणामः घोषितः। एषा परीक्षा १२ जून दिनाङ्के आयोजिता आसीत्। यूआईटी-वेबसाइट उपरि श्रेणीवार-योग्यतासूची २५ जून दिनाङ्के अपलोड् भविष्यति। विधिसंस्थानस्य चयनकर्तृभ्यः उम्मीदवारभ्यः २९ जून दिनाङ्कस्य मध्यरात्रिं यावत् स्वकीयं सेमेस्टर शुल्कं प्रदातुं निर्देशः दत्तः अस्ति।

# जुखाला-क्षेत्रे होराद्वयं यावत् यानस्तम्भनम्, महाविद्यालये विज्ञान-वाणिज्य-सङ्कायययोः स्थगनेन प्रकुपिता जनता



**हिमसंस्कृतवार्ताः- बिलासपुरम्।** १५ पञ्चायतेभ्यः निर्मितात् एकमात्र- जुखाला- महाविद्यालयतः विज्ञान-वाणिज्य-सङ्काययोः स्थगनस्य आदेशेन क्षेत्रवासिनः अतीव प्रकुपिताः सन्ति, तैश्च 'जुखाला महाविद्यालय बचाओ मञ्च' इति सङ्घटनं कृतम्। मञ्चेन जुखाला- महाविद्यालय- चौक इत्यस्य समीपे होराद्वयं यावत् यानस्तम्भनं विहितं स्पष्टः सन्देशश्च दत्तः यत् यदि अद्य सायङ्कालपर्यन्तं अस्मात् महाविद्यालयात् स्थगिताः सङ्कायाः पुनः प्रवृत्ताः न क्रियन्ते, तर्हि श्वः होरात्रयं यावत् यानस्तम्भनं करिष्यते, तदनन्तरं च अनिश्चितकालाय यानस्तम्भन- आन्दोलनं स्थास्यति। मञ्चस्य कथनं वर्तते यत् महाविद्यालये छात्राणां सङ्ख्यापि पर्याप्ता अस्ति, प्रतिवर्षं च विश्वविद्यालयस्य वरीयतासूच्याः शीर्ष-१० स्थानेषु अस्य महाविद्यालयस्य छात्राः स्वस्थानं प्राप्नुवन्ति। महाविद्यालयस्य निर्धनाः छात्राः 'नेट-सेट' परीक्षासु अपि साफल्यं प्राप्तवन्तः। यदा अयं विद्यालयः एतादृशं श्रेष्ठं परिणामं ददाति, तर्हि अस्य सङ्कायद्वयस्य स्थगनं सर्वथा अनुचितं वर्तते।

# काङ्ग्रेससर्वकारेण सम्पूर्णप्रदेशे विक्रयार्थं

## हिमाचलम् इति लाञ्छनं प्रस्थापितम्- जयरामठाकुरः







हिमसंस्कृतवार्ताः- लघ्वीकाशी मण्डी।वर्तमानकाङ्ग्रेससर्वकारेण सम्पूर्णे प्रदेशे विक्रयार्थं हिमाचलम् अर्थात् 'हिमाचल ऑन सेल' इति सूचकपत्रं स्थापितं, यतः अयं सर्वकारः प्रदेशस्य बहुमूल्याः सम्पत्तिः विक्रेतुं प्रयतते। अस्य अनुमतिं भारतीयजनतापक्षः (भाजपा) न तु पूर्वं दत्तवान् न च अधुना सुक्खूसर्वकाराय दास्यति। यथा भाजपा द्वारा आशङ्का प्रकटीकृता आसीत् यत् सर्वकारः स्वकीयानां प्रियाणां लाभाय सर्वकारीयसम्पत्तीः विक्रेतुं गच्छति, तथैव अधुना प्रचलति। एताः वाचः बुधवासरे मण्डयाम् पूर्वमुख्यमन्त्रिणा प्रतिपक्षनेत्रा च जयरामठाकुरेण कथिताः। एतस्मात् पूर्वं जयरामः भारतीयजनतापक्षस्य मण्डलाकार्यालये '१२ वर्षाणि विश्वासस्य, विकासस्य, जनकल्याणस्य च' इति विषये आधृतायाः एकस्याः विशेषचित्रप्रदर्शिन्याः शुभारम्भं वीक्षणं च अकरोत्। जयरामठाकुरः प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वस्य प्रशंसां कृत्वा अवदत् यत् केन्द्रसर्वकारस्य अधुना यावत् कार्यकालः देशस्य कृते अतीव स्वर्णिमः अभवत्। जयरामठाकुरः ऐतिहासिकस्य विश्वप्रसिद्धस्य च 'वाइल्ड फ्लावर हॉल' इति उपाहारगृहस्य (होटल) प्रस्तावित- निविदाप्रकरणम् अधिकृत्य अवदत् यत् अस्य विषयस्य निर्णयप्राप्तौ महत्यां विजये च वास्तविकं श्रेयः पूर्वतन- भाजपासर्वकारस्य प्रयासेभ्यः पूर्वतनेभ्यः सर्वेभ्यः सर्वकारेभ्यश्च गच्छति, परन्तु सुक्खूः केवलं स्वकीयां मिथ्या-प्रशंसां प्राप्तुं व्यग्रः अस्ति।जयरामेण प्रख्यापितं यत् अस्याः सम्पत्तेः उपरि न्यायालयस्य निर्णयः प्रायः सार्धद्विवर्षेभ्यः पूर्वमेव आगतः आसीत्, परन्तु वरिष्ठेन अधिवक्त्रा मनुसिंघवीमहोदयेन सर्वकारस्य उपरि निरन्तरं प्रभावः स्रष्टः आसीत्, येन विलम्बः संजातः। अधुना वर्तमानसर्वकारः अस्य निविदाप्रक्रियायां महतीं त्रुटिं कृत्वा कस्यचित् एकस्य प्रियजनस्य साक्षात् लाभाय प्रयतते।

जयरामः अकथयत् यत् सुक्खूसर्वकारः अधुना यावत् प्रदेशस्य बह्वीः सम्पत्तीः विक्रीतवान्, अस्यामेव शृङ्खलायाम् अग्रे वर्धमानः अयं सर्वकारः सद्यः एव राज्यपर्यटनविकासनिगमस्य १८ बृहतीः सम्पत्तीः उपाहारगृहाणि च वैयक्तिकक्षेत्राय, अनुबन्धे दातुम् आदेशान् प्रसारितवान्। अस्यैव विरोधे पर्यटननिगमस्य सर्वे कर्मचारिणः अद्य वीथिषु अवतीर्य प्रदर्शनं कुर्वन्तः सन्ति। अस्मिन् अवसरे विधायकः अनिलशर्मा, भाजपा प्रदेशमहामन्त्री पायलवैद्या, मण्डलाध्यक्षः निहालचन्दशर्मा च उपस्थिताः आसन्।

# शिमलानगरे मुसलाधारेण वृष्टिः, शीतलं मनोहरं च अभवत् वातावरणम्



**हिमसंस्कृतवार्ताः-** **शिमला।** बुधवासरे हिमाचलप्रदेशस्य राजधान्यां शिमला- नगरे मुसलाधाररूपेण (झमाझम) वृष्टिः अभवत्, येन कारणेन समग्रे क्षेत्रे वातावरणं सर्वथा शीतलम् अभवत्। अपरपक्षे, मङ्गलवासरे गगनं स्वच्छं मेघहीनं च आसीत्, येन मैदानी-क्षेत्रेषु (समतलभूभागेषु) सूर्यस्य आतपः तीक्ष्णः जातः, उष्मायाः प्रकोपश्च अवर्धत। ऊना-मण्डले अधिकतमं तापमानं ३९°C (एकान्नचत्वारिंशत् सेल्सियस्) यावत् अङ्कितम्। तथापि, मौसमविज्ञानविभागेन अनुमानं प्रकटितं यत् २५ जून दिनाङ्कात् आरभ्य २९ जून दिनाङ्कं यावत् 'पश्चिमी विक्षोभ' इत्यस्य सक्रियतायाः कारणात् राज्यस्य बहुषु भागेषु गर्जनेन सह वृष्टेः प्रचण्डवातस्य च सम्भावना वर्तते। अस्मिन्नेव समये, कुल्लू- लाहौल- स्पीति- मण्डलयोः उन्नत-पर्वतशिखरेषु या हिमवृष्टिः सञ्जाता, सा पर्यटकाणां मनांसि आकर्षति।

## समतलक्षेत्रेषु भीषणा उष्मा, जनजीवनं च अस्तव्यस्तम्

मङ्गलवासरे प्रदेशस्य अधिकांशभागेषु तीक्ष्णः सूर्यप्रकाशः प्रसरितः आसीत्, येन कारणेन ऊना, हमीरपुर, बिलासपुर, कांगड़ा, मण्डी इत्येतेषां मण्डलानां निम्नक्षेत्रेषु तापमानं सामान्यात् अधिकं संवृत्तम्। मैदानी-मण्डलेषु एतया वर्धमानया उष्मणा जनाः अतीव व्याकुलाः अभवन्। मध्याह्नकाले मार्गेषु शून्यता दृश्यते स्म, जनाः च स्वेषु गृहेषु एव स्थिताः आसन्।

## पर्वतीयक्षेत्रेषु हिमपातस्य मनोहरं दृश्यम्

यत्र एकतः समतलक्षेत्रेषु भीषणतापस्य स्थितिः आसीत्, तत्रैव अपरतः सोमवारस्य रात्रौ कुल्लू- लाहौल- स्पीति-मण्डलयोः उच्चशिखरेषु हिमपातः अभवत्। रोहताङ्ग-गिरिद्वारे तस्य समीपवर्तिषु क्षेत्रेषु च लाहौल-मण्डलस्य पर्वताः हिमेण श्वेताच्छादिताः जाताः। रोहताङ्ग-सहितेषु उन्नतशिखरेषु ५ तः १० सेन्टीमीटर पर्यन्तं हिमस्य स्तरः सञ्चितः अस्ति। मङ्गलवासरे यदा सूर्यः उदितः, तदा पर्यटकाः हिमस्य मध्ये क्रीडन्तः आनन्दम् अन्वभवन्, एतस्य मनोहरस्य प्राकृतिकदृश्यस्य च आनन्दम् अहरन्।

## आगामिदिनेषु वृष्टेः वात-चक्रस्य च सचेतनता- सूचना

मौसमविज्ञानकेन्द्रस्यानुसारम्, २५ जून दिनाङ्कात् प्रदेशे 'पश्चिमी विक्षोभः' प्रभावी भविष्यति। अस्य प्रभावेण २५ जून तः २९ जून पर्यन्तं राज्यस्य अनेकमण्डलेषु मन्द-मध्यमरूपा वृष्टिः, मेघगर्जनं, तीव्रगत्या वायुप्रवाहः, केषुचित् स्थानेषु च प्रचण्डवातचक्रं भवितुं शक्नोति। एषः ऋतुपरिवर्तनात्मको बदलावः तापात् किञ्चित् उपशमं दास्यति, परन्तु सहैव झञ्झावातस्य विपदम् अपि वर्धयिष्यति।

## तापमाने सम्भाव्यमानानि परिवर्तनानि-

वर्तमानकाले राज्यस्य बहुषु भागेषु न्यूनतम-तापमाने कश्चपि महत् परिवर्तनं न दृश्यते। तथापि, आगामिषु दिवसेषु पश्चिमी विक्षोभस्य सक्रियतायाः हेतोः तापमानस्य ह्रासः भवितुं शक्नोति, विशेषतः तेषु क्षेत्रेषु यत्र वृष्टेः महती सम्भावना वर्तते।

## हिमाचले मौसमी-वायुः (मानसून) कदा प्रवेक्ष्यति?

दक्षिण-पश्चिम- मानसूनस्य गतिः पुनः तीव्रा सञ्जाता अस्ति, किन्तु इदानीं यावत् एषः आधिकारिकरूपेण सम्पूर्णे हिमाचलप्रदेशे न प्रविष्टः। मौसमविभागस्य सङ्केतस्य आधारेण २५- २८ जून दिनाङ्कयोः मध्ये हिमाचलप्रदेशस्य अधिकांशभागेषु मानसूनस्य आगमनस्य पूर्णसङ्केतः अस्ति। अस्मिन् समये राज्ये वृष्टेः गतिविद्धयः तीव्राः भविष्यन्ति, अनेकेषु स्थानेषु च विद्युत्- गर्जनेन सह मुसलाधारेण पर्जन्यः वर्षिष्यति।


# Shrikhand Yatra- भीमडवारी-पार्वतीबाग- मार्गः संकटपूर्णः, श्रीखण्डयात्रायां संशयः




**हिमसंस्कृतवार्ताः-** **कुल्लूः।** अग्रिममासे प्रस्तावितां श्रीखण्डमहादेवयात्रां अधिकृत्य मण्डलप्रशासनेन सज्जताः तीव्रीकृताः, परन्तु विशेषज्ञानां प्रतिवेदनेन (रिपोर्ट) यात्रायां संशयः उत्पादितः। विशेषज्ञैः अस्मिन् वारे भीमडवारीतः पार्वतीबागं यावत् मार्गः असुरक्षितः कथितः अस्ति। बुधवासरे श्रीखण्डमहादेवन्यासस्य (ट्रस्ट) उपवेशनम् अध्यक्षस्य कुल्लू-उपायुक्तस्य अनुरागचन्द्रशर्मणः अध्यक्षतायाम् अभवत्। उपवेशने २०२६ तमवर्षस्य प्रस्तावितायाः यात्रायाः आयोजने, मार्गस्य सुरक्षायां व्यवस्थासु च चर्चा विहिता। प्रदेश-मिल्कफेड-अध्यक्षः न्यासस्य संस्थापकसदस्यः बुद्धिसिंहठाकुरः समेताः सर्वकारीयाः अ-सर्वकारीयाश्च सदस्याः आभासीय- माध्यमेन उपवेशने भागं गृहीतवन्तः।उपायुक्तेन ज्ञापितं यत् यात्राशृङ्खलायाः सुरक्षायाः व्यवहार्यतायाश्च आकलनं कर्तुं राजस्व- वनविभागयोः अधिकारिणाम्, अटलबिहारी- वाजपेयी- पर्वतारोहण- सम्बद्ध- क्रीडासंस्थान-मनाली इत्यस्य विशेषज्ञानां संयुक्तं दलं निर्मिता आसीत्। अनेन ८, १८ जून दिनाङ्के यात्राशृङ्खलायाः निरीक्षणं कृत्वा प्रतिवेदनं समर्पितम्। प्रतिवेदनानुसारं भीमडवारीतः पार्वतीबागं यावत् मार्गः वर्तमानपरिस्थितिषु अतीव संवेदनशीलः जोखिमपूर्णः च प्राप्तः।विशेषज्ञैः आगामि-प्रावृट्काले भूस्खलनस्य, शैलानां पतनस्य, सहसा जलस्तरवर्द्धनस्य, आकस्मिक- जलौघस्य मलिनावशेषप्रवाहस्य च आशङ्का प्रकटीकृता। पर्वतारोहणसंस्थान-मनाली इत्यस्य 'स्की इंस्ट्रक्टर' अङ्कुशकुमारः 'ट्रैकिंग गाइड' गोपालसिंहश्च उपवेशने स्पष्टीकृतवन्तौ यत् वर्तमानपरिस्थितिषु श्रीखण्डमहादेवयात्रा सुरक्षिता न मन्तुं शक्यते, अस्याः अनुशंसा च न क्रियते। भीमडवारी-पार्वतीबागयोः मध्ये वर्तमानमार्गेण सहैव प्रस्तावितः वैकल्पिकमार्गः अपि अस्मिन् समये सुरक्षितः नास्ति। कस्यापि दुर्घटनायाः आपदायाः वा स्थितौ अस्मिन् क्षेत्रे साहाय्य-रक्षणकार्याणां (राहत एवं बचाव कार्य) सञ्चालनम् अपि अतीव कठिनं भविष्यति। विशेषज्ञैः भीमडवारी-क्षेत्रस्य शिविरस्थलम् (कैंपिंग क्षेत्र) अपि उच्चसंकटयुक्तं कथितम्, यत्र वर्धमानेन जलप्रवाहेण, आकस्मिकजलौघेन, मलिनावशेषप्रवाहेण च गम्भीरं सङ्कटं भवितुं शक्नोति। संस्थानेन अस्य प्रभावितभागस्य उच्चसङ्कटक्षेत्रम् इति घोषयितुम् अनुशंसा कृता। उपायुक्तः अनुरागचन्द्रशर्मा अवदत् यत् मण्डलप्रशासनं श्रीखण्डमहादेवयात्रा न्यासश्च श्रद्धालूनां सुरक्षां प्रति पूर्णरूपेण कटिबद्धाः सन्ति।

# प्रधानमंत्रीमोदी-महोदयस्य अध्यक्षतायां 'प्रगति' इत्यस्याः द्विपञ्चाशत्तमी (५२) उपवेशनम्

प्रधानमंत्री नरेन्द्र मोदी महोदयः ह्यः (कल) नवदेहल्यां 'प्रगति' (PRAGATI) इत्यस्याः द्विपञ्चाशत्तमी (५२) बैठक-उपवेशनस्य अध्यक्षतां कृतवान्। अस्मिन् उपवेशने मार्ग-विद्युत्-औद्योगिकगलियारे-मेट्रोरेल-क्षेत्राणां प्रायः ३०००० कोटि (करोड़) रूप्यकाणां चतुसृणां प्रमुखाणां आधारभूत-संरचना-परियोजनानां (इन्फ्रास्ट्रक्चर प्रोजेक्ट्स) समीक्षा कृता।प्रधानमन्त्रिणा उक्तं यत् परियोजनासु विलम्बेन व्ययः (लागत) वर्धते तथा च जनता समयतः लाभं प्राप्तुं न शक्नोति। सः मन्त्रालयेभ्यः राज्यसर्वकारेभ्यः च लम्बित-समस्यानां शीघ्रं समाधानं कर्तुं तथा च परियोजनानां नियमितरूपेण निरीक्षणं (मॉनिटरिङ्ग) सुनिश्चितं कर्तुं निर्देशं दत्तवान्।अस्मिन् उपवेशने 'टीबी मुक्त भारत अभियान' इत्यस्यापि समीक्षा कृता। प्रधानमन्त्रिणा क्षयरोगाद् (तपेदिक) मुक्तये कृत्रिम-प्रज्ञायाः (AI - Artificial Intelligence) उपयोगे बलं दत्तं, तथा च एनसीसी (NCC) कैडेट-सदस्यान् 'माय भारत' स्वयंसेवकांश्च जन-जागरूकता-अभियानेन सह योजयितुं सुझावः दत्तः।प्रधानमंत्री मोदी महोदयः सैबर-अपराधेन (Cyber Crime) डिजिटल-बन्धन-प्रक्रियया (Digital Arrest) च सम्बद्धानां निवेदनानाम् अपि समीक्षां कृतवान्।



सः सैबर-वञ्चनायाः (Cyber Fraud) रोधाय, याचिकानां त्वरित-निवारणाय, संस्थानां मध्ये च उत्तम-समन्वयाय बलं दत्त्वा राज्येभ्यः 'ई-जीरो एफआईआर' (e-Zero FIR) व्यवस्थां प्रवर्त्तयितुं कार्यं कर्तुम् आह्वानं कृतवान्।

# पञ्जाबराज्यं मादकद्रव्यैः, वर्धमानेन ऋणभारेण, गङ्गस्टर-संस्कृत्या च गम्भीररूपेण हानितम्- अनुरागठाकुरः



**हिमसंस्कृतवार्ताः- हमीरपुरम्।** पूर्वकेन्द्रीयमन्त्रिणा हमीरपुर-संसदीयक्षेत्रस्य सांसदेन च अनुरागसिंहठाकुरेण संसदभवने लोकलेखासमित्याः उपवेशनस्य परं पत्रकारैः सह सम्भाषणकाले कथितं यत् पञ्जाबराज्यम् अद्य 'आम आदमी' दलस्य कुशासनात्, नशात्, गङ्गस्टर- संस्कृत्याः, अराजकतायाश्च मुक्तिम् इच्छति। पञ्जाबस्य जनता सुशासनाय विकासाय च भारतीयजनतापक्षं (भाजपा) प्रति आशापूर्णदृष्ट्या पश्यन्ती अस्ति। तेन उक्तं यत् पञ्जाबराज्यं मादकद्रव्यैः (ड्रग्स), वर्धमानेन ऋणभारेण, गङ्गस्टर- संस्कृत्या च गम्भीररूपेण हानितं जातम्। राज्यम् अराजकतायाः माफियाराजाच्च मुक्तं भूत्वा विकासमार्गे अग्रे वर्धितुम् इच्छति। तेन आरोपः कृतः यत् काङ्ग्रेस-अकालीदल-'आम आदमी' दलानि स्व-स्वशासनकाले पञ्जाबस्य विकासस्यापेक्षया राजनैतिकहितान् प्राधान्यं दत्तवन्तः, येन कारणेन गतेषु सार्धदशकवर्षेषु (१५ वर्षेषु) राज्यं प्रगतेः स्थाने अपराधे अव्यवस्थायां चिक्षिप्तम्। सः अवदत् यत् पञ्जाबस्य जनतया पर्यायक्रमेण सर्वेभ्यः दलेभ्यः अवसराः दत्ताः, परन्तु कोऽपि पञ्जाबस्य हितानां रक्षां कर्तुं सफलः नाभवत्। एतादृश्यां स्थितौ अद्य भाजपैव जनतायाः कृते एकस्य सशक्तविकल्परूपेण सम्मुखीभूता अस्ति। तेन कथितं यत् पञ्जाबस्य आवश्यकता 'द्विचक्रिका' सर्वकारः अस्ति। यदि देशः नक्सलवादात् मुक्तः कर्तुं शक्यते, तर्हि पञ्जाबम् अपि गङ्गस्टर-मादकद्रव्यमुक्तं विधातुं शक्यते।तेन प्रतिपादितं यत् मिथ्याप्रतिश्रुतीनाम् आधारेण सत्तां प्राप्तायाः 'आम आदमी' कूटसंस्थायाः गमनसमयः आगतः। तेन आरोपः कृतः यत् मुख्यमन्त्रिणः आचरणं विधानसभातः आरभ्य सार्वजनिक- जीवनपर्यन्तं गरिमाानुकूलं नास्ति, सत्तायां स्थातुं च इदम् 'आम आदमी' दलं कस्मंश्चिदपि स्तरं यावत् पतितुं शक्नोति। गुरुनानकदेवमहोदयस्य ५५० तमः प्रकाशपर्वः भव्यरूपेण मानितः, साहिबजादानां बलिदानदिवसः 'वीर बाल दिवस' रूपेण मानयितुं परम्परा आरब्धा। तेन उक्तं यत् १९८४ तमवर्षस्य सिखविरोधिदङ्गानाम् अन्वेषणार्थं विशेषान्वेषणदलं अपि मोदिसर्वकारस्य काले एव निर्मिता आसीत्।

# 'यदि बसयानानि न चालनीयानि तर्हि कुञ्चिकाः प्रत्यर्पयन्तु'... एच.आर.टी.सी. कार्यविरामे उपमुख्यमन्त्रिणः मुकेश अग्निहोत्रिणः कठोरः सन्देशः



**हिमसंस्कृतवार्ताः- शिमला ।** हिमाचल- पथ- परिवहन-निगमस्य (एच. आर. टी. सी.) कर्मचारिणां प्रस्तावित-कार्यविरामं प्रति उपमुख्यमन्त्रिणा परिवहनमन्त्रिणा च मुकेश अग्निहोत्रिणा कठोरा कार्यविधिः अङ्गीकृता। बुधवासरे शिमलायां आयोजितायां पत्रकारगोष्ठ्यां तेन कथितं यत् सर्वकारः कर्मचारिणां सम्माने संवादे च विश्वसिति, परन्तु बस-सेवाः सुबाधिताः करणं कस्यामपि स्थितौ स्वीकार्यं न भविष्यति। तेन उक्तं यत् काङ्ग्रेससर्वकारस्य सङ्घटनात् आरभ्य कर्मचारिभ्यः समये वेतनस्य पेंशनधनस्य च भुक्तिः क्रियमाणा वर्तते। सर्वकारः एकमासस्यापि दोषयुक्तः न अभवत्, एच.आर.टी.सी. कर्मचारिभ्यः समये महार्घतावृत्तिः तथा च पुरातनवृत्तियोजनायाः लाभः अपि प्रदीयते।मुकेश अग्निहोत्री अवदत् यत् एच.आर.टी.सी. संस्थायाः मुख्यमुद्देश्यं जनसेवा अस्ति। प्रतिवर्षं लक्षशः जनाः निगमस्य बसयानेषु यात्रां कुर्वन्ति। अस्मिन् समये कस्यापि राजनैतिक-उद्देश्यस्य अथवा अन्यकारणात् बससेवाः बाधयितुं न शक्यन्ते। तेन स्पष्टीकृतं यत् प्रस्तावितं यानस्तम्भनम् अवैधानिकं वर्तते सर्वकारश्च एतद् अवैधं मनुते। प्रदेशे 'एस्मा' (ESMA) आवश्यक- सेवा-अनुरक्षण- अधिनियमः प्रभावी अस्ति, सर्वकारश्च तस्य प्रावधानानां अन्तर्गतं आवश्यकीं प्रक्रियां विधास्यति। तथापि तेन एतदपि कथितं यत् अस्य विवादस्य समाधानं सम्भाषणेन एव सम्भवम् अस्ति, सर्वकारस्य वार्तायाः द्वाराणि सर्वदा उद्घाटितानि सन्ति। उपमुख्यमन्त्रिणा कथितं यत् यदि चालकाः परिचालकाः च बसयानानि चालयितुं न इच्छन्ति, तर्हि ते यानानां कुञ्चिकाः प्रत्यर्पयन्तु। तेन सचेतना दत्ता यत् कस्यापि कर्मचारिणः नियमं स्वहस्ते ग्रहीतुं, सर्वकारीयसम्पत्तेः हानिं कर्तुं अथवा यात्रिणः मार्गस्य मध्ये अवरोहयितुम् अनुमतिः न दीयसे। तेन ज्ञापितं यत् गुरुवासरतः चालकेभ्यः परिचालकेभ्यश्च तेषां मार्गसम्बद्धाः लिखिताः आदेशाः प्रसारयिष्यन्ते। तेन प्रतिपादितं यत् सर्वकारेण एच.आर.टी.सी. सुदृढीकर्तुं ८१३ नवीनानि बसयानानि क्रीतानि, येषु २७९ वैद्युतक (इलेक्ट्रिक) बसयानानि सम्मिलितानि सन्ति। एतदतिरिच्य २,१९८ कर्मचारिणः अनुबन्धात् नियमितीकृताः, ३२७ परिचालकानां च नियमिता नियुक्तिः कृता। १९८ सेवानिवृत्ताः कर्मचारिणः अपि ओ.पी.एस. (OPS) परिधौ आनीताः सन्ति।

## एचआरटीसी-कर्मचारिणां प्रस्तावितमान्दोलनम् स्थगितम्

हिमाचल-पथ-परिवहन-निगमस्य (HRTC) कर्मचारिणां प्रस्ताविता विरतिः (हड़ताल) स्थगिता अभवत्। बुधवासरे राज्यसचिवालये अतिरिक्त-मुख्य-सचिवस्य (परिवहन) आर.डी. नजीम महोदयस्य अध्यक्षतायां प्रायः होरात्रयं (त्रिघण्टां) यावत् प्रचलितायाः गोष्ठ्याः (बैठक) अनन्तरं चालक-परिचालक-सङ्घैः विरतिं न कर्तुं घोषणा कृता।
गोष्ठ्यां एचआरटीसी-प्रबन्धकस्य कर्मचारिसङ्घटनानां च मध्ये अनेकासु महत्त्वपूर्णासु माङ्गेषु (याचनासु) सहमतिः सञ्जाता।

# "लौकिकन्यायकोशः"

## "इन्द्रजालन्यायः"



इन्द्रजालम् नाम इन्द्रेण विशिष्टयोगपद्धत्या निर्मितं जालम्। तेन एकं वस्तु अपरमिव भासते। इन्द्रजालं नाम माया। मायिकः (मायावी) विशिष्टेन कौशलेन मायया वा एकं वस्तु अपरम् इव दर्शयति।
गर्भधारणम्, अपत्यजननम्, अपत्यवृद्धिः एतत् सर्वम् अगम्यम् अतर्क्यम् अस्ति अर्थात् इन्द्रजालम् अस्ति। द्रष्टव्यम्-

***एतस्मात् किमितीन्द्रजालनपरं***
***यद् गर्भवासस्थितम्।***
***रेतश्चेततति हस्तमस्तकपद-***
***प्रोद्भूतनानाङ्कुरम्।।***
***पर्यायेण शिशुत्वयौवन-***
***जरावेषैरनेकैर्वृतम्।***
***पश्यत्यात्ति शृणोति जिघ्राति***
***तथाऽगच्छत्यथो गच्छति।।***

**डा. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्**

# वार्ता-संवादः



हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। अद्य मया एका विचित्रा वार्ता श्रुता। ओडिशाराज्ये पर्जन्यदेवताम् तोषयितुम् द्वयोः बालकयोः विवाहः कारितः।
**नन्दिनी-** अहो! वृष्ट्यर्थम् अयं कीदृशः अन्धविश्वासः आचरितः! अपि त्वया द्वितीया वार्ता श्रुता? कानडादेशस्य एकेन नगरेण पर्यावरणरक्षायै वृक्षेभ्यः सजीवाधिकारः दत्तः।
**काव्या-** वृक्षाणां रक्षणाय अयं महान् यत्नः कृतः, अतिश्लाघनीयः एषः। नन्दिनि, चीनदेशस्य प्राणिसङ्ग्रहालये भल्लूकवेषं धर्तुं नूतनाः जनाः नियुक्ताः। ते कृत्रिमभल्लूकरूपेण भ्रमणं कुर्वन्ति।
**नन्दिनी-** अहो हास्यजनकम्! मनुष्यैः भल्लूकवेषः धृतः! जनान् वञ्चयितुं कीदृशः मार्गः आश्रितः! काव्ये, जार्जियाराज्ये एका विचित्रा घटना घटिता। तत्र केचन छात्राः रहस्यचित्रजालस्थलस्य माध्यमेन स्वशिक्षिकां भीषयित्वा परीक्षायाम् उत्तमाङ्कान् प्राप्तवन्तः सन्ति।
**काव्या-** सत्यं, परीक्षायाम् अङ्कानां कृते तादृशम् असाधु कर्म तैः छात्रैः कृतम्। शिक्षाक्षेत्रे एतादृशी प्रवृत्तिः कदापि न दृष्टा। अस्तु, अद्य वार्ताः समाप्ताः।